# शिवमंगलाष्टकं

भवाय चंद्रचूडाय निर्गुणाय गुणात्मने ।
कालकालाय रुद्राय नीलग्रीवाय मंगलम् ॥ 1

वृषारूढाय भीमाय व्याघ्रचर्मांबराय च ।
पशूनां पतये तुभ्यं गौरीकांताय मंगलम् ॥ 2

भस्मोद्धूळितदेहाय व्यालयङ्ञोपवीतिने ।
रुद्राक्षमालाभूषाय व्योमकेशाय मंगलम् ॥ 3

सूर्यचंद्राग्निनेत्राय नमः कैलासवासिने ।
सच्चिदानंदरूपाय प्रमथेशाय मंगलम् ॥ 4

मृत्युंजयाय सांबाय सृष्टिस्थित्यंतकारिणे ।
त्र्यंबकाय शांताय त्रिलोकेशाय मंगलम् ॥ 5

गंगाधराय सोमाय नमो हरिहरात्मने ।
उग्राय त्रिपुरघ्नाय वामदेवाय मंगलम् ॥ 6

सद्योजाताय शर्वाय भव्यङ्ञानप्रदायिने ।
ईशानाय नमस्तुभ्यं पंचवक्त्राय मंगलम् ॥ 7

© 2022 Vedam Nadam

सदाशिवस्वरूपाय नमस्तत्पुरुषाय च ।
अघोराय च घोराय महादेवाय मंगलम् ॥ 8

महादेवस्य देवस्य यः पठेन्मंगलाष्टकम् ।
सर्वार्थ सिद्धि माप्नोति स सायुज्यं ततः परम् ॥ 9

॥ इति शिवमंगलाष्टकं संपूर्णम् ॥

© 2022 Vedam Nadam